# Shattrimshatsamvara Stuti

# ષટ્ત્રિંશત્સંવરસ્તુતિઃ

## Document Information

Text title : Shattrimshatsamvara Stuti

File name : ShaTtriMshatsaMvarastutiH.itx

Category : misc, buddha, stuti

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,

Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# ષટ્ત્રિંશત્સંવરસ્તુતિઃ

શ્રીસંવરં મહાવીરં વારાહીં ચાપિ યોગિનીમ્ ।
નમામિ સર્વભાવેન યોગિનીજાલનાયકમ્ ॥ ૧॥

ડાકિનીં ચ તથા લામાં ખણ્ડરોહાં ચ રૂપિણીમ્ ।
ચતુરોઽમૃતભાણ્ડાંશ્ચ બોધિચિત્તેન પૂરિતાન્ ॥ ૨॥

પુલ્લીરમલયોદ્ભૂતં ખણ્ડકપાલસંવરમ્ ।
પ્રચણ્ડાલિઙ્ગણં વીરં નમામિ શિરસિ સ્થિતમ્ ॥ ૩॥

જાલન્ધરાત્સમુત્પન્નં મહાકઙ્કાલસંવરમ્ ।
ચણ્ડાલ્યાલિઙ્ગણં વીરં શિખાદેશે સ્થિતં નમે ॥ ૪॥

ઓડિયાનાત્સમુદ્ભૂતં કઙ્કાલનામ સંવરમ્ ।
પ્રભાવતીસમાપન્નં સવ્યકર્ણસ્થિતં નમે ॥ ૫॥

અર્બુદપીઠમધ્યસ્થં સંવરં વિકટદંષ્ટ્રિણમ્ ।
મહાનાસાસમાપન્નં પૃષ્ઠદેશે સ્થિતં નમે ॥ ૬॥

ગોદાવરીસમુદ્ભૂતં સુરાવીરિણસંવરમ્ ।
સમ્પુટં વીરમત્યાખ્યા વામકર્ણસ્થિતં નમે ॥ ૭॥

રામેશ્વરોદ્ભવં વીરમમિતાભાખ્યસંવરમ્ ।
ખર્વરોસમ્પુટં નાથં ભ્રુવોર્મધ્યસ્થિતં નમે ॥ ૮॥

દેવીકોટોદ્ભવં નાથં વજ્રપ્રભાખ્યસંવરમ્ ।
લઙ્કેશ્વરીસમાપન્નં નમામિ નેત્રકોણગમ્ ॥ ૯॥

મારવાખ્યાત્સમુત્પન્નં વજ્રદેહાખ્યસંવરમ્ ।
દ્રુમચ્છાયાસમાપન્નં નમામિ સ્કન્ધદેશગમ્ ॥ ૧૦॥

કામરૂપોદ્ભવં વીરમઙ્ગુલિકાખ્યસંવરમ્ ।
ઐરાવતીસમાપન્નં નમામિ કક્ષદેશગમ્ ॥ ૧૧॥

ઓકારસ્થાનસઞ્જાતં વજ્રજટિલસંવરમ્ ।
ભૈરવાલિઙ્ગણં વીરં તનુયુગોદ્ભવં નમે ॥ ૧૨॥

ત્રિશકુન્યદ્ભવં નાથં મહાવીરાખ્યસંવરમ્ ।
વાયુવેગાસમાપન્નં નાભિદેશસ્થિતં નમે ॥ ૧૩॥

કૌશલાયાં સમુદ્ભૂતં વજ્રહૂઙ્કારસંવરમ્ ।
સુરાભક્ષીસમાપન્નં નમામિ નાસિકાગ્રજમ્ ॥ ૧૪॥

કલિઙ્ગપીઠસઞ્જાતં સુપ્રભાનામ સંવરમ્ ।
શ્યામાદેવી સમાપન્નં નમામિ મુખભાગજમ્ ॥ ૧૫॥

લમ્પાકસ્થાનસમ્ભૂતં વજ્રપ્રભાખ્યસંવરમ્ ।
સુભદ્રાલિઙ્ગણં વીરં કણ્ઠદેશોદ્ભવં નમે ॥ ૧૬॥

કાઞ્ચ્યાખ્યપીઠસઞ્જાતં મહાભૈરવસંવરમ્ ।
હયકર્ણાસમાપન્નં નમામિ હૃદિમધ્યગમ્ ॥ ૧૭॥

હિમાલયોદ્ભવં વીરં વિરૂપાક્ષાખ્યસંવરમ્ ।
ખગાનનાસમાપન્નં મેઢ્રસ્થાનગતં નમે ॥ ૧૮॥

પ્રેતપુર્યાં સમુદ્ભૂતં મહાબલાખ્યસંવરમ્ ।
ચક્રવેગાસમાપન્નં લિઙ્ગસ્થાનગતં નમે ॥ ૧૯॥

ગુહદેશાત્સમુદ્ભૂતં રત્નવજ્રાખ્યસંવરમ્ ।
ખણ્ડરોહાસમાપન્નં નમામિ ગુદમધ્યગમ્ ॥ ૨૦॥

સૌરાષ્ટ્રદેશસમ્ભૂતં હયગ્રીવાખ્યસંવરમ્ ।
શૌણ્ડિન્યાલિઙ્ગણં વીરં નમામિ ઉરુમધ્યગમ્ ॥ ૨૧॥

સુવર્ણદ્વીપસઞ્જાતમાકાશગર્ભસંવરમ્ ।
ચક્રવર્મિણીસમાપન્નં જઙ્ઘામધ્યગતં નમે ॥ ૨૨॥

નગરપીઠમધ્યસ્થં શ્રીહેરુકાખ્યસંવરમ્ ।
સુવીરાલિઙ્ગણં વીરં નમામ્યઙ્ગુલિવર્તિનમ્ ॥ ૨૩॥

સિન્ધુદેશસમુદ્ભૂતં પદ્મનૃત્યાખ્યસંવરમ્ ।
મહાબલાસમાપન્નં પાદપૃષ્ઠગતં નમે ॥ ૨૪॥

મરુતીપીઠસઞ્જાતં વૈરોચનાખ્યસંવરમ્ ।
ચક્રવર્તિનીસમાપન્નં નમામ્યઙ્ગુષ્ઠમધ્યગમ્ ॥ ૨૫॥

કુલતાયાઃ સમુદ્ભૂતં વજ્રસત્ત્વાખ્યસંવરમ્ ।
મહાવીર્યાસમાપન્નં જાનુદ્વયગત નમે ॥ ૨૬॥

પૂર્વદ્વારે સ્થિતં વીરં વજ્રચણ્ડાખ્યસંવરમ્ ।
કાકાસ્યાલિઙ્ગણં વીરં નમામિ સુરનાયકમ્ ॥ ૨૭॥

ઉત્તરદ્વારમધ્યસ્થં વજ્રાનલાખ્યસંવરમ્ ।
ઉલૂકાસ્યાસમાપન્નં નમામિ યક્ષનાયકમ્ ॥ ૨૮॥

પશ્ચિમદ્વારમધ્યસ્થં વજ્રોષ્ણીષાખ્યસંવરમ્ ।
શ્વાનાસ્યાસમ્પુટં વીરં નમામિ પન્નગાધિપમ્ ॥ ૨૯॥

દક્ષિણદ્વારમધ્યસ્થં વજ્રકુણ્ડલિસંવરમ્ ।
શૂકરાસ્યાસમાપન્નં નમામિ યમનાયકમ્ ॥ ૩૦॥

આગ્નેયદિગ્વિમાત્રસ્થં વજ્રયક્ષાખ્યસંવરમ્ ।
યમદાઢીસમાપન્નં નમામિ વહ્નિનાયકમ્ ॥ ૩૧॥

નૈરૃત્યદિગ્વિભાષસ્થં વજ્રકીલાખ્યસંવરમ્ ।
યમદૂતીસમાપન્નં નમામિ રાક્ષસાધિપમ્ ॥ ૩૨॥

વાયવ્યદિગ્વિભાગસ્થં વજ્રમહાબલાહ્વયમ્ ।
યમદંષ્ટ્રીસમાપન્નં નમામિ પવનાધિપમ્ ॥ ૩૩॥

ઈશાનદિગ્વિભાગસ્થં વજ્રભીષણસંવરમ્ ।
યમમથનીસમાપન્નં નમામિ ભૂતનાયકમ્ ॥ ૩૪॥

એતાન્દેવાન્ નમસ્યામિ દિગ્વિદિક્ષુ સુસંસ્થિતાન્ ।
વીરાન્ વીરેશ્વરીઃ સર્વા હેરુકં પરમેશ્વરમ્ ॥ ૩૫॥

સહજાનન્દાત્મકં દેવં વિશુદ્ધં તાણ્ડવાન્વિતમ્ ।
ડાકિનીજાલમધ્યસ્થં પ્રત્યાત્મવેદ્યગોચરમ્ ॥ ૩૬॥

સ્તુત્વેદં દેવતીચક્રં યન્મયોપાર્જિતં શુભમ્ ।
તેન પુણ્યેન લોકોઽસ્તુ વજ્રડાકપરાયણઃ ॥ ૩૭॥

ઇતિ શ્રી ષટ્ત્રિંશત્સંવરગણચક્રમણ્ડલસ્તુતિઃ સમાપ્તાઃ ॥

*Shattrimshatsamvara Stuti*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*